COMPILED & CIRCULATED BY
TUMPA JANA(ASSISTANT PROFESSOR)
DEPT. OF SANSKRIT
NARAJOLE RAJ COLLEGE

# कुन्तकमते काव्यस्य प्रयोजनम्

संस्कृतकाव्यशास्त्रस्य परम्परायाम् आचार्यः कुन्तकस्य अतिविशिष्टं स्थानं वर्तते। यथा ध्वनिसम्प्रदायप्रवर्तकस्य आनन्दवर्धनस्य 'ध्वनिकार' इति नामान्तरं तथैव अस्यापि 'वक्रोक्तिकार' इति।कुन्तकः एव वक्रोक्तिसिद्धान्तस्य प्रवर्तयिता।अस्य अलंकारशास्त्रस्य ग्रन्थस्य नाम 'वक्रोक्तिजीवितम्' इति।कुन्तकस्य वक्रोक्तिः एव काव्यस्य जीवितं तथा प्राणम् इति प्रमुखः सिद्धांतः।स भारतीयकाव्यशास्त्रस्य परम्परानुसारेण वक्रोक्तिजीवितम्' इति ग्रन्थस्य आरम्भे एव अर्थात् ३,४,५, संख्यककारिकायां काव्यस्य प्रयोजनं विशेषरूपेण निरुपणं कृतम्। काव्यस्य सालक्षण्यं किमिति वक्तुमुद्यमानः कुन्तकः काव्यस्य प्रयोजनं ब्रूते।यथा-

"धर्मादिसाधनोपायः सुकुमारक्रमोदितः।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः"॥१/३॥

"व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः।
सत्काव्याधिगमादेव नूतनौचित्यमाप्यते"॥१/४॥

"चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम्।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते"॥१/५॥

कुन्तकानुसारेण प्रधानतः काव्यस्य त्रीणि प्रयोजनानि सन्ति।यथा-

(१)चतुर्वर्गफलप्राप्तिः

(२)व्यवहारौचित्यस्य परिज्ञानम्।

(३)अन्तश्चमत्कारस्य प्राप्तिः।

## चतुर्वर्गफलप्राप्तिः

चतुर्वर्गफलप्राप्तिः अर्थात् परमपुरुषार्थानां धर्मकामार्थमोक्षाणां प्राप्तिः काव्यस्य महत्त्वपुर्णं प्रयोजनम्। काव्यं हि सुकुमाराभिजातानां राजकुमाराणां कृते चतुर्वर्गस्य प्राप्तेः सहजसरलोपायः। राजकुमारादीनां धर्मादिचतुष्टयस्य प्राप्तिः तथा ज्ञानलाभः अत्यन्तः आवश्यकः।अन्यथा उचितशिक्षासंस्कारस्य अभावेन राज्ये समूहविपत्तिः संजाता। राजकुमारादयः एव वृहद् भूभागस्य भाग्यविधातारः।अतः तेषां व्यक्तित्वं न केवलं स्वेषु तिष्ठति,अपि तु राज्ये व्याप्तं भवति। राजपूत्रादयः धर्मादिचतुर्वर्गफललाभं कर्तुमिच्छन्ति,परन्तु क्लेशस्वीकारे भीताः।ते स्वभावतः कोमलस्वभावाः।जन्मात् प्रभूत्वैश्वर्येण परिपालिताः।तस्मात् आनन्ददायककाव्याध्ययनात् अतीव सहजेन धर्मादिचतुर्वर्गं परमपुरुषार्थं लभ्यन्ते ते।यतः काव्यं सह्रदयह्रदयहारी,परिपाटीविन्यासेन उदितम्।तथाविधपुरुषार्थस्य उपदेशः परैरपरैरापि शास्त्रै अभिधीयते।परन्तु शास्त्रेषु धर्माद्युपदेशः कठोरक्रमाभिहितत्वात् दुरवगाहः।श्रवणे,पठने,अर्थज्ञापने च शास्त्रम् अतीव कष्टकरम्,तदपि चतुर्वर्गसिद्धिविषये विद्यमानः उपदेशः शास्त्रेषु अकिंचित्करः।काव्यं शास्रस्य विपरीतम् ,अत्यन्तसुकुमारशैल्या तथाविधे विषये उपदेशं ददाति।तस्मात् मम्मटेन काव्यप्रकाशस्य प्रथमोल्लासे उक्तं –

'कान्तासम्मिततयोपदेशयुजे'-अर्थात् काव्येन चतुर्वर्गस्य साधनायाः उपदेशः कान्तासम्मितो भवति।कुन्तकस्य सुकुमारक्रमादिः एव मम्मटस्य कान्तासम्मितेन सह तुलनीयः।काव्यस्य चतुर्वर्गसाधनस्य इति प्रयोजनस्य कथा प्रायः आलंकारिकैः उक्तम्।यथा भामहेन तस्य काव्यालंकारग्रन्थे उक्तम्-

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्'।।१/२

रुद्रटेन तस्य काव्यालंकारः ग्रन्थे कथितः-

'ननु काव्येन क्रियते सरसानामवगमश्चतुर्वर्गे।
लघुमृदु च नीरसोऽभ्यस्ते हि त्रस्यन्ति शास्रेभ्यः'।।(१/४/८)

साहित्यदर्पणे विश्वनाथः अवदत्

'चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरुपं निरुप्यते'।।(१/२)

## व्यवहारौचित्यस्य परिज्ञानम्

काव्यानुशीलनेन परमपुरुषार्थस्य लाभ एव काव्यस्य गुरुत्वपूर्णं प्रयोजनम्।इदं प्रयोजनं विशेषतः अभिजातानां राजपुरुषाणां कृते प्रयोज्यम्।परन्तु साधारणमनुष्यान् निकषा काव्यस्य किं प्रयोजनम् अस्ति? तस्मात् कुन्तकेन अस्य प्रयोजनस्य उल्लेखः कृतः।

अस्य प्रयोजनस्य व्याख्याप्रसंगे कुन्तकेन उक्तं व्यवहारं अर्थात् लोकव्यवहारस्य परिज्ञानं व्यवहारिणः जनस्य उत्तमकाव्याधिगमादेव लव्धम्।काव्ये महतां हि राजादीनां व्यवहारे वर्ण्यमाने सति तदंगभूताः मुख्यामात्यप्रभृतयः सर्वेषां समुचितप्रातिस्विककर्तव्याः निपुणतया विद्यमानाः भवन्ति।ततः सर्वः क्वचित् कमनीयकाव्ये कृतश्रमः समासादितव्यवहारः परिस्पन्दसौन्दर्यातिशयः श्लाघनीयफलभाग् भवति।अस्य प्रयोजनस्य कथा मम्मटेनापि तस्य काव्यप्रकाशस्य प्रथमोल्लासे उक्तः-

'कांव्यं यशसे अर्थकृते व्यवहारविदे शिवेतरक्षतये।'

भरतेनापि नाट्यस्य तथा काव्यस्य प्रयोजनप्रसंगे कथितः-

'लोकपदेशजननं नाट्यमेतद् भविष्यति।'

## अन्तश्चमत्कारस्य प्राप्तिः

काव्यामृतारुपं रसं पीत्वा सहृदयस्य हृदये अपूर्वमेकस्य चमत्कारस्य उदयो भवति।यः चतुर्वर्गफलप्राप्तेः अधिकः श्रेष्ठः वा।परमपुरुषार्थस्य चतुर्वर्गफलप्राप्तेः आस्वादं सर्वशास्त्रस्य प्रकृष्टं प्रयोजनम्।परन्तु काव्ये परमपुरुषार्थस्य लाभेन सह काव्यामृतरसः अपि व्याप्तः भवति।यः पाठकस्य चेतसि चमत्कृतिः विस्तार्यते।कुन्तकस्य अभिप्रायः –'सोऽसौ चतुर्वर्गफलास्वादः प्रकृष्टपुरुषतया सर्वशास्त्रप्रयोजनत्वेन प्रसिद्धः,सोऽपि अस्य काव्यामृतचर्वणस्वरुपस्य चमत्कारकलामात्रस्य न कामपि साम्यकलानां

कर्तुमर्हतीति।इयं चमत्कृतिः तत्कालः एव अर्थात् काव्यपठनस्य अनन्तरं जायते।तस्मात् मम्मटाचार्येण उक्तः-

'सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे'

शास्त्रं सर्वदा कटु- औषधवत् अविद्यायाः नाशकम्,परन्तु काव्यम् आनन्ददायकममृतवत् अज्ञानरूपस्य व्याधेः नाशकम्।अतः उक्तम्-

'कटुकौषधवच्छास्त्रमविद्याव्याधिनाशकम्।

आह्लाद्यमृतवत् काव्यमविवेकगदापहम्।।'

आनन्दो हि काव्यस्य मुख्यं प्रयोजनम्।अस्य प्रयोजनस्य कथा प्रायः आलंकारिक उक्तवान्।भामहेन कथितः

'करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्।'

वामनेनापि तस्य काव्यालंकारसूत्रवृत्तिः ग्रन्थे उक्तः-

'काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात्।।'